E-14

Shri Raghunatha Temple MSS. Library,
JAMMU

छ ३४

No. ५५ ज

Title सिद्धान्त कौमुदी टीका

Author

Extent ७ पत्र Age

Subject व्याकरण

© Dharmarth Trust. Digitized By eGangotri

सिद्धान्त कौमुदी टीका

॥५५॥ (रव)

(रव

© Dharmarth Trust. Digitized By eGangotri

सिद्धान्तकौमुदीव्याख्या प० ६ श्लो० २२६

नं ५५

ॐ श्रीगणेशाय नमः ॥ मया भट्टोजिदीक्षितेनेयं सिद्धान्तकौमुदी विरच्यते ॥ किं कृत्वा मुनित्रयं नमस्कृत्य च तु
न सद्गुक्तीः परिभाव्येत्यन्वयः ॥ बहुशास्त्राभिज्ञत्वं भट्टत्वं । भट भट परिभाषणे पचाद्यच् भट्टस्त्रिसक
ल शास्त्राभिज्ञा भट्टाः भट्टाननुजयति इति भट्टोजिः निपातनादुदोदलोपः । आगमशास्त्रस्यानित्यत्वा
नुगागमो भावः ॥ अनित्यत्वे किं प्रमाणं सागरं तर्तुकाम इति भाष्यप्रयोगमेव प्रमाणं । यद्वा । उग्रशम्भु
लस्माज्जातः उजो वरः सोऽस्या स्तीत्युजी भट्टश्चासावुजी च भट्टोजी । दीक्षमौण्ड्येज्योपनयन नियम
व्रतादेशेषु दीक्षणं दीक्षा दीक्षा संजाता अस्येति दीक्षितः ॥ भट्टोजी चासौ दीक्षितश्च भट्टोजिदीक्षितः
कि= तेन मया भट्टोजिदीक्षितेन व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम् । करणाधिकरण
योश्चेति ल्युट् व्याकरणमधीयते विदन्ति वा वैयाकरणाः ॥ सिद्धो निष्पन्नोऽन्तो निष्क्रियो येषां ते सिद्धा
न्ताः ॥ वादिप्रतिवादिभ्यां निर्णीततत्त्वनाशे परं हितार्थाः सिद्धान्ताः ॥ मोदन्ते मुत् सम्पदादित्वाद्भावे क्वि
प् कौ पृथिव्यां मुदानन्दो यस्मादिति कुमुदश्चन्द्रः कुमुदः इयं शक्तिः कौमुदी ॥ चन्द्रिका कौमुदी ज्योत्स्ना
प्रसादस्तु प्रसन्नता इत्यमरः ॥ वैयाकरणसिद्धान्तानां कौमुदीव कौमुदी वैयाकरणसिद्धान्तकौमु
दी प्रकाशकत्वेनात्र सादृश्यं ॥ यथा आकाशस्था कौमुदी अन्धकारगतान् घटपटादीन् प्रकाशयति
श= तथा इयं कौमुदी वैयाकरणसिद्धान्तान् प्रकाशयति ॥ पुनः सा कौमुदी सूर्यजन्यसन्तापं शमयति तथेयम्
॥ अथवा तापापनोदकत्वेन सादृश्यम् ॥ यथा सा घर्माद्युद्भूतजनिक्लेशं शैत्यादिनापनोदयति
तथेयमिति ॥ अतिदुरूहग्रन्थान्तरेभ्यः सिद्धान्तज्ञाने जायमानक्लेशरूपसंतापं तज्ज्ञानेनापनो
दयतीत्यर्थः ॥ नन्विदम् शब्दस्य प्रत्यक्षवर्तिवस्तुप्रयोगो लोकतः सिद्धस्तत्कथमिह करिष्यमा
णायां कौमुद्यां तत्प्रयोग इति चेत् ॥ करिष्यमाणायामपि कौमुद्यां बुध्यासन्निधापितत्वेनेयमिति प्रयोग
स्याविरोधत्वात् ॥ ननु वीत्यनेन किं वैशिष्ट्यं प्रतिपाद्यते इति चेत् अन्येये काशिकाप्रक्रियादयो ग्रन्था

॥ इदमस्तु सन्निकृष्टे समीपतरवर्ति चैतदो रूपं अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात् ॥ २ =३

© Dharmarth Trust. Digitized By eGangotri

सेषु सिद्धान्ताऽपसिद्धान्ताश्च वर्तन्ते अपसिद्धान्ताएव रच्यन्ते नापसिद्धान्ता इदमेवात्रवै शिष्टप्रमिति न्यायाः ॥
१ मुनित्रयं नमस्कृत्येति ॥ मन्तारो वेदशास्त्रार्थतत्त्वावगन्तारो मुनयः ॥ मननशीलावा मुनयः मनेरुच्चेत्यौणा
दिकसूत्रेण मनेः पर इत्प्रत्ययोऽन्त उकारो गुणस्तु नेह भवति निपातनात् तपरकरणाद्वा ॥ त्रयो
ऽवयवाऽस्य त्रयम् संख्याया अवयवे तयप् द्वित्रिभ्यां तयस्यायच् । मुनीनां त्रयं मुनित्रयम् ननु
स्वयम्भुवे नमस्कृत्येत्यत्रापि नमःस्वस्तीत्यादिना चतुर्थी स्यान्नैवम् ॥ उपपदविभक्तेः कारक
विभक्तिर्बलीयसीति वक्ष्यमाणत्वान्नमस्करोति देवानितिवद् द्वितीयाया एव युक्तत्वात् । पदमाश्रित्यो
त्पद्यते या विभक्तिः सा उपपदविभक्तिः क्रियामाश्रित्योत्पद्यते या विभक्तिः सा कारकविभक्तिः । कि
ञ्च जहत्स्वार्थवृत्तिरिति पक्षे नमः शब्दस्यात्र निरर्थकत्वात्तद्योगे चतुर्थी न भवति ॥ अर्थवद्ग्रहण परि
भाषया ह्रदन्तेः । स्वयम्भुवे नमस्कृत्येत्यत्र तु स्वयम्भुवमनुकूलयितुमित्यर्थविवक्षायां क्रियार्थोपपदस्ये
त्यादिना चतुर्थी मूल एव स्फुटीभविष्यति । न चैवं नमस्स्वस्तीति सूत्रे नमः पदमव्यर्थमिति शंक्यम् । हरये
नम इत्यत्र हरिमनुकूलयितुमित्यर्थेऽविवक्षिते सम्बन्धसामान्ये षष्ठ्याः प्राप्तायास्तद्बाधकत्वात्तस्या
वश्यकत्वात् । तदुक्तीरिति । तेषां पाणिन्यादीनामुक्तीः सूत्रवार्तिकभाष्याणीत्यर्थः । तस्य मुनित्रयस्य
स्योक्तिरिति व्याख्यानेऽपि । मुनिसमुदायेन सूत्रवार्तिकभाष्यमवाचोक्तमिति समुदायिनां मुनीना
मेवोक्तिरिति पर्यवस्यति ॥ परिभाव्येति ॥ पर्यालोच्येत्यर्थः । न च परिपूर्वस्य भवतेस्तिरस्कारा
थी= र्थत्वात्कथमयमनार्थतेति शंक्यम् ॥ परीत्यस्य भावयतिचुरादिणिजन्तेन योगात् । केचित्तु
भवतिनायोगमभ्युपेत्याहुः ॥ परौ भुवोऽवज्ञाने इति सूत्रे परौ भुव इत्यस्यावज्ञान इति विशेषणेन
तिरस्कारार्थत्वनियमः ॥ मनसा परिभाव्य किञ्चिदित्यादि श्रीहर्षादिप्रयोगाच्च ॥ अत एवात्रा
प्युक्तशङ्कापि नास्तीति । अन्ये तु अनादरः परिभवः परीभावस्तिरस्क्रियेति कोशात्परिपूर्वकाद्भ
दोष= प्राप्तिः शिवः १

© Dharmarth Trust. Digitized By eGangotri

परिभूयपरिभवति इत्यतो ऽपितिरस्कार प्रतीतेः ॥ वैयाकरणेति । व्याकरणमधीयते विदन्ति वा वैयाकरणास्तेषां
भ्रान्तानां कौमुदी प्रकाशिकेत्यर्थः ॥ निर्दुष्टसकलजनाल्हादकत्वसाम्येन कौमुदीशब्द प्रयोगः । विरच्यते मयेति
शेषः । रचप्रतियत्ने प्रतियत्नो गुणाधानम् विपूर्वादस्माद्वर्त्तमानात्सामीप्ये भविष्यदर्थे ऽ वर्त्तमानप्रत्ययः ॥
मुनित्रयमिति समाप्तिम्प्रति मंगलस्य कारणत्वम् ननु कादम्बर्यादिग्रन्थे मंगले कृते ऽपि समाप्तिर्नास्ति । ना
स्तिकादिग्रन्थे मंगलाभावे ऽपि समाप्तिः । तत्कथं मंगलस्य कारणत्वमुच्यते ॥ कादम्बर्यादौ मङ्गलस्य स्वल्पत्वा
त्समाप्तिर्न नास्तिकादिग्रन्थे पूर्वजन्मनः पुण्योपचयात्समाप्तिस्तस्मान्मङ्गलस्य कारणत्वमेव अर्थांशे
भाष्यमपिप्रमाणम् । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि आयु
ष्मत्पुरुषकाणि च अध्येतारश्च मङ्गलयुक्ता यथा स्युरिति ॥ तच्च त्रिविधम् विघ्नध्वंसकं वस्तुनिर्देशात्म
कं नमस्कारात्मकं चेति गौरीप्रवः के तक पत्र मित्याग विघ्नध्वंसकं अस्त्युत्तरस्यामित्यादि वस्तुनिर्देशा
त्मकम् नमस्कारात्मकागैवेति ॥ ननु मध्यगुरु जगणस्य रोगदायकत्वात्मध्यगुरुं कथं लिखितवान् ॥
देवतावाचका ये च ये च भद्रादिवाचकास्ते सर्वे नैव दूष्याः स्युर्लिपितो गणितो ऽपि वा ॥ ग्रन्थे समाप्ति
ग्रन्थप्रचारादिप्रतिबन्धकदुरितशमनाय समुचितं अभिमतनमस्काररूपं मङ्गलमाचरन् ॥ शिष्य
शिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति मुनित्रयमित्यादिना कारकविभक्तेर्ब
लवत्वाद्द्वितीया । तत्कृदस्येति बुद्धिस्थपरामर्शकत्वात्स्याचामुक्ती हितिरस्कृत्येत्यर्थः । मुनित्रयोक्तीर्विचार्य
त्यर्थो वा ॥ इति ॥ १ ॥ ॥ अइउण् इत्यादि सूत्रेषु संधिकार्यं तु न भवति संहितायाः अविवक्षा
भवति । अइउण् इत्यादीनां तु तिङन्त घटितत्वाभावेन वाक्यत्वं नेति चेन्न आदिरन्त्येनेति सूत्रैकवाक्यतया
भवतीति क्रियाध्याहारेण अइउण् इत्यण् भवतीत्याद्यर्थे वाक्यत्वस्य सुवचत्वात् ॥ सोऽत्र त्वादृशेभ्यो न विभक्तु
त्पत्तिः कारप्रत्ययोऽपि न वाहुलकात् इति अनेनैव संहितायाः अविवक्षितत्वात् पूर्वोक्तं समाधानम् असङ्गतम् ॥

© Dharmarth Trust. Digitized By eGangotri

चाहूलकात् कारप्रत्ययोऽप्यसंगतम् ॥ ननु चएणं सूत्राणां मध्ये किमिदं सूत्रम् ॥ आदिरन्त्येनेत्यनेनैकवाक्यतया वृत्तौ पदेशघटार्थं
सूत्रत्वमेषाम् । आदिरकारादिरन्त्येनेतातत् सहितेन णकारादिना सहोच्चार्यमाणो मध्यगानां वर्णानां संज्ञेत्यर्थः ॥
नन्वणिति क्वचित् पूर्वणकारेण गृह्यते क्वचित्तु परेण णकारेण । इणत्र परणकारेणैव तथा च निःसंदेहाय अनुवन्धा
२ न्तरमेवकर्त्तुमुचितम् । सत्यम् । व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् इति परिभाषाज्ञापना लक्षणमनुज्ञापकं अलक्षणं अननुज्ञापकम्
2 र्थाय पुनर्णकारोऽनुवन्ध इति स्थितमाकरे ॥ माहेश्वराणीति ॥ चतुर्दशसूत्राणां समाहारः चतुर्दशसूत्री ॥
ननु चतुर्दशसूत्र्यामक्षरसमाम्नाय इति व्यवहारानुपपत्तिः ॥ आम्नायसमाम्नायशब्दयोर्वेद एव प्रसिद्धे
रित्यत आह इति माहेश्वराणि सूत्राणि ननु एषां प्रयोजनं किम् इत्यत आह अणादिसंज्ञार्थानीति । अण आदिर्या
सां ताः अणादयः अणादयश्च ताः संज्ञाः अणादिसंज्ञा अणादिसंज्ञा अर्थः प्रयोजनं येषां तानीति विग्रहः । अर्थेन
नित्यसमासो विशेष्यलिङ्गता चेति वक्ष्यमाणत्वात् ॥ महेश्वरादागतानि माहेश्वराणि महेश्वरादागतात्वं तु
नित्यसमासो विशेष्यलिङ्गता चेति वक्ष्यमाणत्वात् ॥ महेश्वरादागतानि माहेश्वराणि महेश्वरादागतात्वं तु
थे प्रमाणं च शिक्षावचनम् ॥ तदुक्तम् ॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै
पाणिनये नमः ॥ अपरं च प्रमाणम् ॥ नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ॥ उद्धर्तुकामः स
नकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ ननु अणादिसंज्ञादीनां सिद्धिः कथमित्यत आह एषामन्त्या इ
तः ॥ प्रत्याहारप्रसिद्धयेऽनुनासिकत्वेन प्रतिज्ञातो यो लणसूत्रे अकारः सोऽपि इत्संज्ञकः ॥ अकारश्चेद्
ति ॥ अनन्यत्वात् पृथगुक्तिः वचनविपरिणामेनेतीमीत्यादि ति संवध्यते ॥ इत्संज्ञा चोपदेशेऽजनुनासिक
इत्यनेन इत्यन्तु रणरपर इत्यत्र लपरे यथासंख्याद्युत्तदर्थक तुल्यास्य सूत्रस्य कैयटानुरोधेन । परेतु र
प्रत्याहारस्य प्रामाणिकत्वे तोलरान्तस्येति सूत्रे रान्तस्य त्येवावक्ष्यत् यण घटितप्रत्याहारे चार्द्धमात्रा
लाघवानुरोधेनयमेव निर्दिशेत् । तस्माल्लपरत्वेति वक्तव्यमिति वार्त्तिकेनैव लपरसिद्धिरित्याहुः ॥
इदमत्र चिन्त्यम् ॥ लकारो पादानमकारेण प्रत्याहारस्यासार्वत्रिकत्वज्ञापनाय अतएव यप्रत्याहा
रेण निर्दिष्टः ॥ यत्तु अन्तरङ्गत्वादित्संज्ञायां लोपे च कृते अनुवन्धानामसत्त्वात्प्रत्याहारेषु ग्रहणं न भवतीति
प्रमाणं चात्र लपरत्वं वक्ष्यामीति उरण्रपर इति सूत्रभाष्यम् । लपरत्वं वक्ष्यामीत्युक्त्वा तदग्रे किंचिन्नोक्तम् अतो ज्ञायते तपरप्रत्याहारस्याप्ययत्नम् ।
कत्वेन प्रत्याहारप्रत्ययेन तत्कार इत्याहु[illegible] ॥=९

© Dharmarth Trust. Digitized By eGangotri

॥ लण सूत्राकारस्यानुनासिकत्वेतु हल्संज्ञायाः आकृचकारस्येत्संज्ञाभावेनोपदेशेऽननुनासिक इतीत्संज्ञाभावाद्धल
प्रत्याहारे प्रवेशापत्तिः ततः सूत्रेत्यादौ सोलीवापत्तिः । एवंच लोपप्रश्नवैव लवत्तर इति तृतीयहेतोरव्यापकत्वाप
त्तिरिति तन्न सोत्यादिरिति निर्देशाद् णनां भेदकत्वाच्चन दोष इति समाधानस्य कैयटस्य एव युक्तत्वात
किंच्चोपदेशेऽतिजित्यत्र अजित्यकारान्तरं प्रश्लिष्य हल्प्रत्याहार सिद्धेः ॥ प्रागपि इत्संज्ञायांबाधकाभावः रा
त्संस्य यस्य हल इत्यादौ तु व्याख्यानान्न प्रत्याहारग्रहणम् ॥ उच्चारणार्थ इति प्रत्याहारे चानुबन्धानां कथमग्रहणेषु
न॰ आचारादप्रधानत्वाल्लोपश्च बलवत्तर इति ॥ ह ॥ उच्चारणार्थ इति हयवरट् इत्यादौ अकारोच्चारणेन अकारवि
शिष्टस्य हल्त्वात् रामो हसति इत्यत्रो तेऽपि रामो ह्नि नास्ति इत्यत्र उत्वन्नस्यात् इत्य तन्नाह हकारादिष्विति प्रमाणन्तु
यत्तुल्यजातीयान् तुल्यजातीयेषु उपदिशति अचो अच्षु हलो हल्षु इति सूत्रकारस्य शैलीसिद्धत्वात् ॥ हल
न्त्यमिति ॥ हलि अन्त्यमिति विग्रहे सप्तमी शौण्डैरित्यनेन समास इति चेन्न अन्त्यशब्दस्य शौण्डादिगणे पाठा
भावात् । न च सप्तमीति योगविभागात्समासः योगविभागस्य एव प्रामाणिकायो भाष्ये दृष्टोऽस्य भाष्येऽ
दर्शनात् ॥ सहसुपेत्यनेनतु समास आपादितुं सप्तम्यन्तेन नार्ह स्त्यागतिक गतित्वादस्मादत्र हलोऽन्त्य
हलन्त्यमिति षष्ठीतत्पुरुषो निर्बाधत्वात्स्वीकार्यः ॥ सूत्रन्तु हलन्त्यमेतावन्मात्रम् उक्तौ सूत्रे इति कस्मा
लभ्यते अत्राप्युपदेश इति संबध्यते तद्बलेन लभ्यमाह सूत्र इति हलिति सूत्रे इति स्पष्टार्थ कथनं । वाक्यार्थ
स्तु हलोऽन्त्यमित्येव ॥ आदिरन्त्येन सहेतेति ॥ अन्त्येनेत्संज्ञकेन सहितः सहोच्चारितः आदिस्संज्ञास्यादित्यक्षरा
र्थः प्राप्तः ननु कस्य संज्ञास्यादित्याकांक्षायामवयविनं विना अवयवानामसंभवात् आद्यन्ताभ्यामवयवत्वे
न बोधकाभ्यामवयवी आक्षिप्यते सच समुदायरूपः एवंच अन्त्येनेतासहित आदिः स्वघटित समुदाया
वयवानां संज्ञेत्यर्थः तत्राद्यन्तयोः समुदायावयवत्वेन तयोर्ग्रहणं संज्ञास्वरूपात् । संज्ञासंज्ञिनं बोधयति
नत्वात्मानमिति न्यायात् एवंच अन्त्येनेत्संज्ञकेन सदृशेन वर्णेन हेसह कोर्थः सहोच्चारितः आदिः कोऽर्थः
आदिभूतोवर्णः स्वघटितसमुदायः स्वातिरिक्तस्य अवयव द्वारा संज्ञास्यात् । स्वरूपमित्यतः स्वमनुवर्त्तते ॥

© Dharmarth Trust. Digitized By eGangotri

३

स्वस्यकोऽर्थः आदेरविभवति । स्वशब्देनान्तस्यनग्रहणं सर्वनाम्नामुत्सर्गतः प्रधानस्यैवग्रहणं अंत्येनेत्यप्रधान
तृतीयानिर्देशात् अंत्येनेतिकिम् सुडितिप्रत्याहारः तृतीयैकवचनावयवेनमाभूदितिभावः तथाप्यंतेने
त्यग्रहणसामर्थ्यादंतत्वप्रयुक्तायस्येत्संज्ञा तेनैव प्रत्याहारः नहिटाटकारे हलन्त्यमित्संज्ञाप्रवर्तते ॥
इतेतिकिम् रप्रत्याहारेग्रयथास्यात् आदिः किम् ॥ अंत्येनादिरासिध्यते आदिग्रहणसामर्थ्यात्
सूत्रेउच्चार्य्यमाणोयः आदिः तस्यैवग्रहणम् ॥ अन्यथाइकोयणचीति सूत्रे इक्प्रत्याहारे अकार
ग्रहणंस्यात् समाभूदित्येतदर्थमादिग्रहणम् ॥ इतिहलसंज्ञायामिति ॥ इतिनोम आदिरन्त्येनेत्येतत्सूत्रे
ण हलसंज्ञायांकृतायां सत्यां पश्चात् हलन्त्यमित्यस्यवाक्यार्थः ॥ नन्वथाध्यायां हलन्त्यमित्ये
कमेवशास्त्रम् तस्यअर्थः यदिहलितिसूत्रे अन्त्यमित्स्यात्तर्हि नविभक्तौ तुस्माइत्यादिशा
स्त्राणांवैयर्थ्यापत्तिः विभक्तिस्थतवर्गसकारमकाराणां सूत्रान्तरेणेत्संज्ञायाः अप्रवृत्तेः तस्मादुपदेशे अन्त्यह
लित्स्यादित्यर्थोऽवश्यंवाच्यः ॥ तथासतिवाक्यार्थबोधे हलपदार्थज्ञानस्यकारणम् तथाहलपदार्थतानमन्तरा
सूत्रार्थानुपपत्त्या हलपदार्थजिज्ञासायामादिरन्त्येनेत्येतत् जिज्ञासा आदिरन्त्येनेत्येतत् जिज्ञासायाञ्चताव
दर्णेत्संज्ञाजिज्ञासावश्यकी । एवञ्च हलन्त्यमित्येतत्सूत्रसाध्य अन्तवर्णेत्संज्ञाज्ञानाधीनमादिरन्त्येनेत्येतत्
वाक्यार्थः ॥ आदिरन्त्येनेत्येतत्सूत्रसाध्यहलप्रत्याहारज्ञानाधीनो हलन्त्यमित्यतद्वाक्यार्थः ॥ इत्यन्योन्याऽऽश्रयः ॥
अन्योऽन्याश्रयाणि शास्त्राणि साधयितुं नप्रकल्प्यन्ते यथा नौ नौ विवद्धानेतरत्राणायभवतीति चेन्न हलन्त्य
मित्यस्यावृत्त्यार्थद्वयस्यापिस्वीकारेणदोषत्वात् । अतएव भाष्येऽप्यन्योऽन्याश्रयमाशंक्य हलितंत्रंभवतिल
कारश्चेद्भवतीतिवक्तव्यमित्युक्तेकशेषनिर्देशात्सिद्धम् हलचहलचहलन्त्यमित्युक्तम् । ननूपदेशेऽजन्त्यम् ।
अच् । अनुनासिकइतिसूत्रत्रयमस्तु । अजित्यनन्योर्थम् । तृतीयेअजित्यनुवृत्तिसामर्थ्यादचेइद्भवति तर्हिअनु
नासिकएवेतिनियमाश्रयणादुप्रभृतौ नदोषः । योगविभागस्येष्टसिद्ध्यर्थत्वाच्चानन्तरस्येतिन्यायंबाधित्वाप्यवहित

ननुहलपदेन हलधातुरेवोपस्थाप्यताम् इतिचेन्न धातुलकारस्येत्संज्ञायांफलाभावात् आदिरन्त्येनेतिवैयर्थ्याच्च ।
वाक्यार्थबोधे पदार्थज्ञानकारणं । अतः सूत्रार्थस्या तस्यादरः हितः ॥ =

[illegible] क्रमः ॥

शिवः
३

© Dharmarth Trust. Digitized By eGangotri

एवञ्च हलन्त्यमविकार्यम् ॥ अन्योन्याश्रयदोषश्च न भवति न च पाणिनि सूत्रभेदे पारायणादावदृष्ट हानिः तथा च
तत्र तत्र भाष्यमपाणीयन्तु भवतीति वाच्यम् । कल्पमान ‡ न्यासस्य लघुते अस्या दोषत्वात् सूत्रभेदनमुपा
चरन्ति यत्र तदेवान्यत्सूत्रं क्रियते भूयो वा यदि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेद इति ॥ अचउपसर्गात्त इति सू
त्रभाष्यात् नासौ सूत्रभेद इति अस्य दोषायेति शेषः । सम्यवैदृष्ट द्वारैवाङ्गानामदृष्टात्वैयर्थ्यमिति तदाशयः । अते
एवतगतस्तापके ज्ञापकपरः सकलभाष्योच्छेदेनेति चेन्न योगविभागनियमज्ञापकाश्रयणेति गौरवात् ।
नहि वर्णाभिव्यक्तिजनक एवाद्यभिघातगौरवमेव दृष्टव्यम् नतु ज्ञानजनकमनोव्यापारगौरवमिति राज्ञा
नाम्नि ॥ उपदेशे किम् अग्निचित् सोमसुदिति काशिका तेनेत्संज्ञायां लोपः स्यान्न च तुकोवैयर्थ्यं अग्नि
चितावितिचरितार्थत्वात् । अन्त्यमिति किम् । मनिनो कारस्य मा भूदिति भावः हलिति किम् भूधातोरन्त्य
स्येत्संज्ञा मा भूत् । न च प्रयोजनभावान्नेत्यमिति वाच्यम् । सत्यामित्संज्ञायामूदितः इति विकल्पापत्तेः ॥
उपदेश आद्योच्चारणमिति उपसाद्यर्थकत्वादिशे उच्चारे क्रियात्वादुपोपसृष्ट दिशधातुप्रकृतिक
घञन्तस्य आद्योच्चारणमर्थः । ततोऽण् अजित्यादिसंज्ञाभ्यामिति तदनन्तरं अण् अजित्यादिसंज्ञाभि
र्वा सत्यां पश्चादुपदेशे ऽजनुनासिक इत्यस्य चाक्यार्थः ॥ यद्यप्ययोगो पजीव्यत्वादनुनासिकसंज्ञा प्रथमं
वक्तुमुचिता तथापि नासिकामनुगत इति समासेनैव गतार्थत्वादनुनासिकसंज्ञासूत्रं मन्दप्रयोजनं
ध्वनयितुं नेहोपन्यस्तम् ॥ एवं धातोरनुनासिक प्रतिज्ञेति उच्चारणे प्रसिद्धेः अनुनासिकोऽच्
कथं विज्ञायेत इत्यत आह प्रतिज्ञानुनासिक्याः पाणिनीयाः प्रतिज्ञायते यासा प्रतिज्ञा आतश्चोप
सर्गे कर्मण्यङ् ॥ प्रतिज्ञाख्या बोध्यमानमित्यर्थः अनुनासिकस्य भावः अनुनासिक्यम् प्रतिज्ञैवानु
नासिक्यं येषां ते प्रतिज्ञानुनासिक्याः । पणनं पणः पणोऽस्यास्तीति पणी ब्रह्मा पणिनो गो
त्रापत्यं पाणिनिः पाणिनिनो आदिनाप्रोक्ताः वर्णाः पाणिनीयाः कोऽर्थः पाणिनिनाप्रोक्ताः
वर्णाः प्रतिज्ञानुनासिक्याः भवन्ति कोऽर्थः प्रतिज्ञाबोधितअनुनासिकत्वधर्मविशिष्टा भवन्तीत्यर्थः । प्रतिज्ञाचास्मे
वेति कथनम्वर्णानां तत्र ज्ञापको व्यवहारश्च ताभ्यां तज्ज्ञानं सुलभमिति भावः प्रतिज्ञातारश्च पत्यासत्यैतदुक्तत्वक

© Dharmarth Trust. Digitized By eGangotri

हकारादिषु पुनः पुनरकारोच्चारणेन उच्चारणार्थं वर्णरहितं हलाम् प्रत्याहारे ग्रहणाभावस्य वक्तुं शक्यत्वेन प्रत्याहारे षितां न ग्रहणमिति चिंत्यं प्रयोजनम् ॥ =४

सूत्रस्याकारस्येत्संज्ञा लण्सूत्रं ऽकारश्चेत्यनेन पूर्वं सूचितासंज्ञा तस्याः किं फलमत आह लण्सूत्रस्येत्यादि ।
लण् च तत्सूत्रं लण्सूत्रं लण्सूत्रे तिष्ठतीति लण्सूत्रस्थः लण्सूत्रस्थश्चासाववर्णश्च लण्सूत्रस्थावर्णः
तेन लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा नाम बोधक इत्यर्थः । ननु लस्यैव यकारस्यापि
मध्यगत्वाद् दृढ़ लानामिति वक्तव्ये रलयोरिति न्यूनमत आह प्रत्याहारेषु षितां न ग्रहणम् इतां कोऽर्थ इ
त्संज्ञकानां प्रत्याहारेषु कोऽर्थः अजादिप्रत्याहारेषु ग्रहणं न कुतः अनुनासिक इत्यादिनिर्देशात् ननु प्रत्या
हारे अनुबन्धानां कथमग्रहणं तेषु न ॥ आचारादप्रधानत्वाल्लोपश्च बलवत्तरः इति भाष्यवार्त्तिके प्रत्याहार
शब्दस्य वर्णसत्तान्तग्रहणमिति भवदुक्तमयुक्तमत आह आदिरन्त्येनेत्यादिद्वयेति दिक् प्रत्याहारे षिति
अन्यथा नासिकादौ यण्प्रवृत्तिरिति भावः नन्वित्वविधानसामर्थ्यात् यणभावस्यासिद्धत्वेन कथमनुनासि
क इत्यादिनिर्देशानां ज्ञापकत्वम् । न च येन नाप्राप्तिन्यायेनेत्संज्ञया एव बाधकत्वेऽपि नोसाशक्यत्वात् प्रत्यय
निष्पन्ननासिकाशब्दे यस्येति लोपस्य प्राप्तत्वेन लाघवान्नासिक इत्येव वक्तव्ये नासिकाशब्दस्योच्चारणस्य
ज्ञापकत्वान्न दृश्यत इति वाच्यम् । इति चेन्न केन इति ह्रस्वेत्वाभ्याम् परत्वाद्यस्येति लोपस्य प्राप्तत्वेन । सकृ
द्गतौ विप्रतिषेधे न्यायात् भ्रष्टावसरत्वाच्च पुनस्तदप्रवृत्तेः नासिक इत्यस्यासाधुत्वात् न च नित्यं यस्येति लोपः
शब्दान्तरप्राप्तः तस्यापि नित्यत्वात् अनग्रहणसामर्थ्येन केण इत्यस्य बाधकत्वाच्च पुनस्तु न प्रवृत्तिरत्र
प्राप्तावसरत्वादित्युक्त आह आदीति अगेत्वविधानसामर्थ्यात् यणेनेति वाच्यम् ॥ सौत्रलाघवात्तु बाधकल्पना
येत्तया प्रत्याहारे षितां न ग्रहणमिति कल्पना एव कर्त्तव्या ॥ ७ ॥ ऊकालेति ॥ उश्च ऊश्च ऊ३श्च वः वः का
लो यस्य स ऊकालः ननु समानाधिकरणो नावेव बहुव्रीहिरिष्टः तथा सति उकारः ऊवर्णो भवति का
लश्च समयः तयोः कथं सामानाधिकरण्यम् इति चेदुच्यते ऊकालशब्दस्योच्चारणकाले लक्षणा
एवं च वः कालो यस्येत्यस्य एकमात्रद्विमात्रत्रिमात्रोकारस्य उच्चारणकालकालो यस्य कोऽर्थः उ
च्चारणकालसदृशः कालो यस्य कोऽर्थः उच्चारणकालसदृशः उच्चारणकालो यस्य इत्यर्थेनादोषा
त् ननु वर्णसमाम्नाये अकारस्याप्यम्यात् । अकाल इत्येव वक्तुमिति चेन्न कुक्कुट रुते उकारस्य क्र
मेण एकमात्रद्विमात्रत्रिमात्रत्वप्रसिद्धेः तथोक्तत्वेनादोषात् ननु हलग्राहिशब्दे अकारस्य प्रसिद्धिरिति

४

ननु अनुनासिक इत्यादौ सौत्रलाघवं प्रमाणं चेत् प्रत्याहारे षितां न ग्रहणमित्यत्र प्रमाणं चिन्त्यम् इति चेन्न सा ताच्छील्ये चेति ॥ =१४ ॥

ननु प्रत्याहारे षितां न ग्रहणमिति समानाधिकरणम् तर्हि समानाधिकरणे इत्संज्ञकानां ग्रहणं न स्यात् इत्येव प्रत्याहारे षितां न ग्रहणम् इति चिन्त्यम् ॥ =७

प्रकृतिप्रत्ययविभागः ॥

© Dharmarth Trust. Digitized By eGangotri

॥ ननु ऊकालइत्यत्रैकमात्रिकोकारपठितत्वे अणुदित्सवर्णस्य चाप्रत्यय इत्यनेन द्विमात्रत्रिमात्रयोर्ग्र
बोधोज्ञायते द्विकमात्रोकारेणवादर्त्तव्यः इति चेन्न तदुक्तं भाष्ये यावत्तपरकरणं तावदन्तकालग्रहण
मिति चेन्न नन्विदं वक्तव्यमादौ एकमात्रिकोकारस्य पाठः कथं ज्ञायते । आदौ त्रिमात्रिकोकारस्य पाठः
इति चेन्न यद्यादौ त्रिमात्रिकोकारस्य तर्हि भगवता ॥ प्लुतप्रगृह्या अचि नित्यमित्यनेन प्रकृतिभावः कृ
तस्स्यात् तदकरणेन ज्ञायते आदौ त्रिमात्रिकोकारस्य पाठोनास्ति नचेदं वचनीयमादौ एकमात्रिको
कारस्य पाठ इति कथं ज्ञायते आदौ द्विमात्रिकोकारस्य पाठ इति चेन्न यद्यादौ द्विमात्रिकोकारस्य
पाठस्यात्तर्हि गोस्त्रियोरुपसर्जनस्येत्यस्मिन्सूत्रे गोग्रहणं व्यर्थं व्यर्थसत्यैव ज्ञापयति द्विमात्रिको
कारस्यादौ पाठो नास्ति यद्यादि द्विमात्रिकस्य प्रयोगश्चेत्तर्हि हे हे प्रयोगे हेहयोश्च व्यर्थं स्यात्
अत्र किं प्रत्यक्षम् अत्र कषयरेकमात्रिकत्वात् ह्रस्वसंज्ञायां ह्रस्वस्य पिति कृति तुक् स्यात् ननु उ
श्रुतिवाक्ये उकारेण त्रयाणां उकाराणां उपस्थित्या ह्रस्वसंज्ञा त्रयाणामपि स्यादिति चेन्न ऊ
कालोऽज्झ्रस्वदीर्घप्लुत इत्येतावत्सूत्रेऽप्युक्तार्थे लब्धे कालग्रहणेन कालसमानाधिकरणत्वे वर्णानां
ग्राहकत्वाभावबोधनात् । तदुक्तं भाष्ये यावत्तपरकरणं तावत्कालग्रहणमिति ननूक्तसूत्रे स्वरू
पेसकृदुच्चरितस्तस्याः कदेशार्थं गमयतीति न्यायादुकाराणामेवैकद्वित्रिमात्राणां ह्रस्वादिसंज्ञा स्या
न्नत्वकारादीनामिति चेन्न ऊ ह्रस्वदीर्घप्लुत इत्येव सिद्धे अज्ग्रहणसामर्थ्यान्नोशब्दस्योकारस्सदृशे लक्षणा ऊ
सदृशोऽज् ह्रस्वदीर्घप्लुतसंज्ञास्यात् इत्यर्थनोदोषात् ॥ सकोऽर्थः लब्धह्रस्वादिसंज्ञोऽच् प्रत्येकं नाम
एकमेकं प्रति उदात्तादिभेदेन त्रिधा ॥ उदात्तत्वसंज्ञाकेन इत्यतआह उच्चैरुदात्त इति उच्चैरित्यस्याच्चैः श्रूय
माण इति नार्थः उपांशुप्रयोगेऽव्याप्तेः ॥ उच्चत्वादीनां पुरुषभेदेनाव्यवस्थितत्वाच्च किन्तु उच्चैरित्य
धिकरणशक्तिप्रधानमव्ययमधिकरणत्वं चोच्चारणं तच्च ताल्वादीनां सभागत्वे एवेत्याशयेनाह ताल्वा
दीति तच्चोर्ध्वभागं बोधयति ऊर्ध्वभागे सति सभागेष्विति स्वरूपकथनं तत्रैव वर्णानां निष्पत्तेः ॥ प्रयत्ने
प्रेरितो वायुरूर्ध्वभागे प्रतिहतोऽचं यं जनयति तदाश्रयेण उदात्तादिति भावः ॥ आद्य इति निपाताः आद्यु
दात्ताः अनेनाकार उदात्तः प्रातिपदिकसंज्ञा ॥ त्यदादीनामः ॥ यकृदत्तू दात्तः केन फिषोऽन्तोदात्तः ॥

© Dharmarth Trust. Digitized By eGangotri

प्रातिपदिकस्यांतउदात्तस्यात् ततःपरस्य जसः सुप्त्वादनुदात्तताकेन अनुदात्तौ सुप्पितौ इतिसूत्रेण जसः
आदेशः ।गुणः ततएकादेश तस्यैचोदात्तलताकेन एकादेशउदात्तेनोदात्तः ॥उदात्तेनसह एकादे
शअनुदात्तेपि उदात्तस्यात् इतिसूत्रेण॥ अचोङिति॥ अभिमुखवाच्ययुत्पन्नोङ्किदम् ॥ अत्रवको
रोत्तर आकार उदात्तः फिषोऽन्तोदात्त इतिसूत्रेण॥ आद्युकार संत्वनुदात्तः केन अनुदात्तंपद
मेकवर्जम् ।यस्मिन्पदे यस्योदात्त स्वरितोवाविधीयते तमेकमचम्वर्जयित्वाशेषं तत्पदमनुदात्ता
च्कंस्यात् ॥अर्द्ध ह्रस्वमित्यत्र ह्रस्वस्या र्द्धमर्द्धह्रस्वमिति समासेतु ह्रस्वस्यैवेखवग्रह्णिः ॥अर्द्धंच
तत् ह्रस्व मर्द्धह्रस्वमिति समासेतुदीर्घादिष्वेव प्रवृत्तिस्यात् इष्यतेतु उभयत्र अतउपेयिवा
नित्यत्र उपसर्ग इव अविवक्षितमित्यर्थः ॥तस्यचोदात्त स्वरितपरत्वेति उदात्त स्वरित परोय
स्मात् तदुदात्तस्वरितपरं तस्यभावस्तत्वं तस्मिन्सति पूर्वस्य स्वरितस्य यदुत्तरार्द्धमनुदा
स्य= त्तं तस्यस्पष्टं श्रवणं ॥अन्यत्र उदात्त स्वरित परत्वाभावे उदात्त श्रवणम् ॥ वैदिकमात्रशब्दा
नुशासनरूपं व्याकरणं प्रातिशाख्यम् तत्रप्रसिद्धा ॥उदात्त पर ह्रस्वस्वरितोदाहरणमाह ॥
क्वेति किमोऽति तित्स्वरितमितिसूत्रेण स्वरितम् ॥ व इति अनुदात्तं सर्वमपादादाविति
सूत्रेणानुदात्तं ।अश्वा इति ।अशेः कनिति नित्स्वरेणाद्युदात्तं ततश्चवः अश्वा इत्यनयोः
संहितायां एकादेशउदात्तेनोदात्त इति सूत्रेण ओकार उदात्तः ततश्च क्वेति स्वरितोत्तरार्द्ध
नुदात्तस्य ह्रस्वार्द्धस्य वो इत्यनुदात्त परत्वात् स्पष्टं श्रवणं ॥उदात्तपर दीर्घस्वरितोदाहरणमा
ह ॥येरा इति अत्रये अरा इत्यनयोर्द्वयोरपि प्रातिपदिकत्वेन फिषोऽन्तोदात्त इतिफिट्
सूत्रेण अन्तोदात्तता ततश्च अरा इत्याद्यस्याकारस्य परिशेषादनुदात्तता एवञ्च ये
इत्यस्य अरा इत्याद्येनाऽकारे ऐकादेशे स्वरितोवानुदात्ते पदादाविति सूत्रेण पदे स्वरितता ततश्च ये इति दीर्घस्वरितस्य रा इत्युदात्तपरतया स्पष्टश्रवणम्॥

शिक्षाः ५

© Dharmarth Trust. Digitized By eGangotri

एवमुदात्तपरयो ह्रस्वदीर्घस्वरितयोरुदाहरणमुक्त्वा स्वरितपरं स्वरितमुदाहरति ॥ योर्ह्यीति ॥ य
इति प्रातिपदिकस्य फिषोऽन्त उदात्त इति फिट्सूत्रेणान्तोदात्तता । ह्य इति अहस्याह्ना वित्यस्मात् क्मीणि
एवाति तित्स्वरितमिति सूत्रेण स्वरितम् । ततो य इति सकारस्य अकारे परे रुत्वे उत्वे आद्गुणे च कृते उदात्ते
नैकादेशात् एकादेश उदात्तेनोदात्त इत्योकार उदात्तः । ततः अह्य इत्यत्र ह्य इति भागस्य तित्स्वरेण स्वरित
त्वे कर्तव्ये शेषनिघातात् आद्याकारस्यानुदात्तता अनुदात्तं पदमेकवर्जमिति सूत्रात् । ततश्च यो इत्युदात्ते
न ओकारेण सह अह्य इत्याद्याकारस्यैकादेशे कृते स्वरितो वानुदात्ते पदादाविति सूत्रेणानुदात्ते अकारे
परे यो इत्यस्य स्वरितता । एवं च यो इति स्वरितपरः ह्य इति स्वरित इति न उदात्तश्रुतिः ॥ अग्निमी
ले पुरोहितं ॥ ईळे इत्येतत् समस्तमपि पदमनुदात्तम् । तिङ् ङ् तिङः अपि तिङन्तात्पर त्तिङन्त
न्निघ्यते । इति सूत्रेण अतिङन्तादग्निशब्दात्परस्य ईळे इति तिङन्तस्य निघातविधानात् । अग्निम्
ईळ इति पदयोः संहिताकाले तु धातुगतस्य ईकारस्य स्वरितत्वम् । उदात्तादनुदात्तः स्वरित इति
सूत्रेण उदात्तात्परोऽनुदात्तः स्वरितः स्यादित्यर्थकेनानुदात्तस्य ईकारस्य स्थाने स्वरितादेशात् ततः
परस्य ळे इत्येकारस्य तिङ्प्रत्ययरूपस्य स्वरितात्संहितायामनुदात्तानामिति सूत्रेण एकश्रुत्वं
स्व= प्रचयनामकं तत्तूं ईळे इतिद्वयोरपि स्वरितत्वे सत्येव एकश्रुतेरविभागेनोक्तेः स्वरितता ॥ ततश्चायं
स्वरितपरः स्वरित इति नोदात्तश्रुतिः । किन्तु ळे इति स्वरितः पुर इत्याद्यात्परो कार रूपानुदात्तपर
तयोदात्तश्रुतिः पुरः शब्दस्य फिट्सूत्रेणान्तोदात्तत्वविधानेन शेषनिघातादाद्यात्तरस्यानुदात्तत्वात् ॥
मुखनासिकेति ॥ मुखं च नासिका चेति विग्रहे प्राण्यङ्गत्वादेकवद्भावेन मुखनासिकमिति स्यादत आह ।
मुखसहितेति ॥ उच्यतेऽसौ वचनः बाहुलकात्कर्मणि ल्युट् ॥ मुखसहिता नासिकेति विग्रहः ।
तथा च अवचन इति साधनं कृतेति समासः तदाह मुखसहितेति ॥ मुखसहितेति किम् । यमानुस्वाराणां

© Dharmarth Trust. Digitized By eGangotri

एवञ्चाङ्गेनुनासिक इत्यत्रानुस्वारः स्यात् नासिकेति किम् शक्तेत्यादावनुनासिकत्वप्रदेशोत्यादिनाकलोपो मा
भूत् । वस्तुतस्तु एकवद्भावेऽपि न क्षतिः आङ्प्रश्लेषेण तथासिद्धेः ॥ तुल्यास्यप्रयत्नमिति तुल्यावास्यप्रय
त्नौ यस्येत्यर्थः आस्ये भवमास्यं व्याख्यानात् तत्तद्वर्णोत्पत्त्यभिव्यक्तिस्थानमेव प्रयत्नस्य स्पृष्टाद्युपादानात्
प्रकृष्टो यत्नः प्रयत्नः स चाभ्यन्तरः तस्य वर्णोत्पत्तेः प्रागभावित्वात् स्वरूपप्रकर्षत्वात् । जनकत्वं पञ्चम्य
र्थः तत्तत्कार्यगतभेदस्थानेप्याश्रयाभेदघटिततुल्यत्वस्य निर्वाहः स्पष्टं चेदम्भाष्ये तदाह ताल्वादीति
शिक्षायां कण्ठादीनां कण्ठत्वादिनैव स्थानत्वात् तथा तद्रूपेणैवास्य भवशब्देन ग्रहणमिति तद्भागभेदमा
दाय नोदात्तादिषु सावर्ण्यभङ्ग इति यस्य तद्द्वयं येन यदीयेन तद्द्वयेन तुल्यमित्यर्थः । तुल्यास्यं किम् ।
तप्री अत्र यकारस्य तकारे परे ऊरोऊरीति लोपो मा भूत् । प्रयत्नग्रहणं किं । वाक्श्च्योतति । शस्य
लोपेन । कस्य किं स्थानमित्याकाङ्क्षायामाह । अकुहेति ॥ नासिका चेति चकारेण स्वस्ववर्गानुकूलं
ताल्वादि समुच्चीयते ॥ एदैतोरित्यत्र तपरकरणमसन्देहार्थं न तु तत्कालस्य ग्रहणार्थं तेन प्लुतस्यापि संग्रहः ॥
दन्ता इति दन्तयुक्तदेश इत्यर्थः । अतो भग्नदन्तस्याप्युच्चारणम्भवत्येव ॥ तुल्यास्यप्रयत्नमितिसूत्रे
प्रशब्देन विलक्षणयत्नबोधेऽपि लोके यत्नप्रयत्नयोः पर्यायत्वेति ध्वनयन्नाह प्रयत्नो द्विधेति क्वचित्
यत्नो द्विधेति पाठः ॥ आभ्यन्तरो बाह्यश्चेति वर्णोत्पत्तिम्प्रति हेतुभूतो यत्नः आभ्यन्तरः ॥ उत्पन्नस्य
वर्णस्य स्फुटताम्प्रति हेतुभूतो यत्नः बाह्यः ॥ जिह्वाग्रोपाग्रमध्यमूलानां तत्तत्स्थानैः सह सम्बन्धः
स्पृष्टमित्युच्यते ॥ ईषत्सम्बन्धः ईषत्स्पृष्टमित्युच्यते ॥ तत्तद्देशापेक्षया दूरावस्थानं विवृतम् ॥
ननु स्पृष्टप्रयत्नादिभिर्भिन्नैरेव सकलवर्णानां व्यापकत्वात् सम्वृतेऽत्र भाष्यमतमाह ह्रस्वेति ।
एवन्तर्हि दण्डानयनमित्यादौ ह्रस्वस्याकारस्य सम्वृतस्यान्तेन दीर्घाकारेण विवृतेन प्रयत्नभेदात्
सवर्णदीर्घो न स्यादत आह प्रक्रियादशायामिति साधनावस्थायामित्यर्थः ॥ ९ ॥ ६ ॥

शिवः १५६

© Dharmarth Trust. Digitized By eGangotri

7

॥लोट्॥ बाधतां बाधेतां बाधन्तां १ बाधस्व बाधेथां बाधध्वं २ बाधै बाधावहै बाधामहै ३॥ लङ्॥ अबाधत अबाधेतां अबाधन्त १
अबाधथाः अबाधेथां अबाधध्वं २ अबाधे अबाधावहि अबाधामहि ३॥ विधिलिङ्॥ बाधेत बाधेयातां बाधेरन् १ बाधेथाः बाधेयाथां
बाधेध्वं २ बाधेय बाधेवहि बाधेमहि ३ आशीर्लिङ्॥ बाधिषीष्ट बाधिषीयास्तां बाधिषीरन् २ बाधिषीष्ठाः बाधिषीयास्थां
बाधिषीध्वं २ बाधिषीय बाधिषीवहि बाधिषीमहि ३ लुङ्॥ अबाधिष्ट अबाधिषातां अबाधिषत १ अबाधिष्ठाः
अबाधिषाथां अबाधिढ्वं॥ ध्वं॥ अबाधिषि अबाधिष्वहि अबाधिष्महि ३ ऌङ्॥ अबाधिष्यत अबाधिष्येतां
अबाधिष्यन्त १ अबाधिष्यथाः अबाधिष्येथां अबाधिष्यध्वं २ अबाधिष्ये अबाधिष्यावहि अबाधिष्यामहि ३॥ ६॥
नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु॥ याच्ञा च उपतापश्च ऐश्वर्यश्च आशीश्च ते याच्ञोपतापैश्वर्याशीषः तेषु याच्ञो
पतापैश्वर्याशीःषु॥ उपतापो रोगः॥ अप्राप्तप्रार्थनमाशीः॥ आशिषि नाथ इति वाच्यं॥ ०॥ अस्याशिष्येवात्मनेपदं स्यात्॥
अन्यत्र परस्मैपदं भवति॥ लट्॥ नाथते नाथेते नाथन्ते १ नाथसे नाथेथे नाथध्वे २ नाथे नाथावहे नाथामहे ३॥ लिट्॥
ननाथे ननाथाते ननाथिरे १ ननाथिषे ननाथाथे ननाथिढ्वे। ध्वे। २ ननाथे ननाथिवहे ननाथिमहे ३॥ लुट्॥ नाथिता
नाथितारौ नाथितारः १ नाथितासे नाथितासाथे नाथिताध्वे २ नाथिताहे नाथितास्वहे नाथितास्महे ३ ऌट्॥ ना
थिष्यते नाथिष्येते नाथिष्यन्ते १ नाथिष्यसे नाथिष्येथे नाथिष्यध्वे २ नाथिष्ये नाथिष्यावहे नाथिष्यामहे ३॥
॥लोट्॥ नाथतां नाथेतां नाथन्तां १ नाथस्व नाथेथां नाथध्वं २ नाथै नाथावहै नाथामहै ३॥ लङ्॥ अनाथत अनाथेतां
अनाथन्त १ अनाथथाः अनाथेथां अनाथध्वं २ अनाथे अनाथावहि अनाथामहि ३ विलिङ्॥ नाथेत नाथेयातां
नाथेरन् १ नाथेथाः नाथेयाथां नाथेध्वं २ नाथेय नाथेवहि नाथेमहि ३॥ आशीर्लिङ्॥ नाथिषीष्ट नाथिषीयास्तां
नाथिषीरन् १ नाथिषीष्ठाः नाथिषीयास्थां नाथिषीध्वं २ नाथिषीय नाथिषीवहि नाथिषीमहि॥ ३॥ लुङ्॥ अना
थिष्ट अनाथिषातां अनाथिषत १ अनाथिष्ठाः अनाथिषाथां अनाथिढ्वं २ "ध्वं" अनाथिषि अनाथिष्वहि
अनाथिष्महि ३॥ ऌङ्॥ अनाथिष्यत अनाथिष्येतां अनाथिष्यन्त १ अनाथिष्यथाः अनाथिष्येथां अना
थिष्यध्वं॥ २ अनाथिष्ये अनाथिष्यावहि अनाथिष्यामहि ३॥ अन्यत्र तु॥ लट्॥ नाथति नाथतः नाथन्ति १ ना
थसि नाथथः नाथथ २ नाथामि नाथावः नाथामः ३ लिट्॥ ननाथ। एल्॥ अतुस्। ननाथतुः। उस्। ननाथुः। थल्। ननाथिथ।
अथुस्। ननाथथुः। ननाथ। अ। एल्। ननाथ। व। ननाथिव। म। ननाथिम॥ लुट्। नाथिता नाथितारौ नाथितारः १ नाथितासि
नाथितास्थः। नाथितास्थ २ नाथितास्मि नाथितास्वः नाथितास्मः ३॥ ऌट्॥ नाथिष्यति नाथिष्यतः नाथिष्यन्ति १ नाथिष्यसि ना

© Dharmarth Trust. Digitized By eGangotri

८

॥लोट्॥ नाथतु नाथतात् नाथतां नाथंतु १ नाथ नाथतात् नाथतं नाथत २ नाथानि नाथाव नाथाम ३॥ लङ्॥ अनाथत्
अनाथतां अनाथन् १ अनाथः अनाथतं अनाथत २ अनाथं अनाथाव अनाथाम ३॥ विधिलिङ्॥ नाथेत् नाथेतां नाथेयुः १
नाथेः नाथेतं नाथेत २ नाथेयं नाथेव नाथेम ३॥ आशीर्लिङ्॥ नाथ्यात् नाथ्यास्तां नाथ्यासुः १ नाथ्याः नाथ्यास्तं नाथ्यास्त २
नाथ्यासम् नाथ्यास्व नाथ्यास्म ३॥ लुङ्॥ अनाथीत् अनाथिष्टां अनाथिषुः १ अनाथीः अनाथिष्टं अनाथिष्ट २ अनाथिषं
अनाथिष्व अनाथिष्म ३॥ लृङ्॥ अनाथिष्यत् अनाथिष्यतां अनाथिष्यन् १ अनाथिष्यः अनाथिष्यतं अनाथिष्यत २
अनाथिष्यं अनाथिष्याव अनाथिष्याम ३॥ एवं नाध्॥ नाधते नाधेते नाधंते १ नाधसे नाधेथे नाधध्वे २ नाधे
नाधावहे नाधामहे ३॥ लिट्॥ ननाधे ननाधाते ननाधिरे १ ननाधिषे ननाधाथे ननाधिध्वे २ ननाधे ननाधिवहे
ननाधिमहे ३॥ लुट्॥ नाधिता नाधितारौ नाधितारः १ नाधितासे नाधितासाथे नाधिताध्वे २ नाधिताहे नाधितास्वहे
नाधितास्महे ३ लृट्॥ नाधिष्यते नाधिष्येते नाधिष्यंते १ नाधिष्यसे नाधिष्येथे नाधिष्यध्वे २ नाधिष्ये नाधिष्यावहे
नाधिष्यामहे ३॥ लोट्॥ नाधतां नाधेतां नाधन्तां १ नाधस्व नाधेथां नाधध्वं २ नाधै नाधावहै नाधामहै ३ लङ्॥
अनाधत अनाधेतां अनाधंत १ अनाधथाः अनाधेथां अनाधध्वं २ अनाधे अनाधावहि अनाधामहि ३॥ विधिलिङ्॥
नाधेत नाधेयातां नाधेरन् १ नाधेथाः नाधेयाथां नाधेध्वं २ नाधेय नाधेवहि नाधेमहि ३॥ आशीर्लिङ्॥ नाधिषीष्ट
नाधिषीयास्तां नाधिषीरन् १ नाधिषीष्ठाः नाधिषीयास्थां नाधिषीध्वं २ नाधिषीय नाधिषीवहि नाधिषीमहि ३
॥लुङ्॥ अनाधिष्ट अनाधिषातां अनाधिषत १ अनाधिष्ठाः अनाधिषाथां अनाधिढ्वं॥ध्वं॥ २ अनाधिषि
अनाधिष्वहि अनाधिष्महि ३॥ लृङ्॥ अनाधिष्यत अनाधिष्येतां अनाधिष्यन्त १ अनाधिष्यथाः अनाधिष्येथां
अनाधिष्यध्वं २ अनाधिष्ये अनाधिष्यावहि अनाधिष्यामहि ॥३॥ दध धारणे ॥धारः धारणं तस्मिन्॥
लट्॥ दधते दधेते दधन्ते १ दधसे दधेथे दधध्वे २ दधे दधावहे दधामहे ३ लिट्॥ देधे देधाते देधिरे १ देधिषे
देधाथे देधिध्वे २ देधे देधिवहे देधिमहे ३॥ लुट्॥ दधिता दधितारौ दधितारः १ दधितासे दधितासाथे दधिताध्वे २
दधिताहे दधितास्वहे दधितास्महे ३ लृट्॥ दधिष्यते दधिष्येते दधिष्यन्ते १ दधिष्यसे दधिष्येथे दधिष्यध्वे २
दधिष्ये दधिष्यावहे दधिष्यामहे ३॥ लोट्॥ दधतां दधेतां दधन्तां १ दधस्व दधेथां दधध्वं २ दधै
दधावहै दधामहै ३ लङ्॥ अदधत अदधेतां अदधन्त १ अदधथाः अदधेथां अदधध्वं २ अदधे अदधावहि
अदधामहि ३ विधिलिङ्॥ दधेत दधेयातां दधेरन् १ दधेथाः दधेयाथां दधेध्वं २ दधेय दधेवहि दधेमहि ३
आशीर्लिङ्॥ दधिषीष्ट दधिषीयास्तां दधिषीरन् १ दधिषीष्ठाः दधिषीयास्थां दधिषीध्वं २ दधिषीय दधिषीवहि
दधिषीमहि ३ लुङ्॥ अदधिष्ट अदधिषातां अदधिषत १ अदधिष्ठाः अदधिषाथां अदधिढ्वं।ध्वं। २ अदधिषि अदधि-

ष्वहि अदधिष्महि ३॥ लृङ्॥ अदधिष्यत अदधिष्येतां अदधिष्यन्त १ अदधिष्यथाः अदधिष्येथां अदधिष्यध्वं २ अदधिष्ये अदधिष्यावहि अदधिष्यामहि ३॥

श्री कं: ८

© Dharmarth Trust. Digitized By eGangotri